This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कं.टी.

पत्रागरत्नाच्युतशिवब्रह्मार्कमुख्यग्रहान्नत्वेजातकपद्धतिंस्फुटतरांहोराविदांप्रीतये यंत्रैःस्पष्टतनु
रोत्रजन्मसमयोविघोत्रखेटास्फुटाः यत्पक्षेहिघटंतउक्तमेहलात्त्रर्क्षसिषन्नः सच १ अथकेशवो
जातकस्यजातकशास्त्रस्यपद्धतिंमार्गंकुर्वे किंकृत्वा नत्वा कान् विघ्नपत्रागरत्नाच्युतशिवब्र
ह्मार्कमुख्यग्रहान् विघ्नपः श्रीमहागणपतिः शारदा श्रीसरस्वती अच्युतःश्रीनारायणः
शिवोश्रीमहादेवः ब्रह्माचतुराननः अर्कमुख्यग्रहाः श्रीसूर्यादयोनवग्रहाः एतान्नत्वा
जातकपद्धतिंकुर्वे किंलक्षणांस्फुटतरां भकरार्थी कस्यैज्योतिर्विदांप्रीतये ज्योतींषिग्रहनक्ष
क्षत्रादीनिविदंतिज्योतिर्विदः तेएतद्धोराशास्त्रविदोभवंत्येव यतोहोराशास्त्रंत्रिःस्कंधज्योतिः
८ शास्त्रस्यैकस्कंधः उक्तंच त्रिस्कंधंज्योतिषंशास्त्रंशास्त्रहोरागणितसंहिताइतिनिदेवस्यमु
के वराहमिहराचार्यैःज्योतिःशास्त्रमनेकभेदविषयंस्कंधत्रयाधि त्कार्त्स्न्योपनयस्यना

मुनिभिःसंकीर्त्यतेसंहितास्कंधेऽस्मिन्गणितेनयाग्रहगती
विनिर्णयश्चकथितःस्कंधस्तृतीयोपरः ज्योतिःशास्त्रस्यकार्त्स्न्यस्यउपनयः उपनयनकथन
नत्संहितेत्युच्यते अन्यैराचार्यैःसंहितास्कंधादनेकभेदास्तु मुख्याःपंचाधिकारास्तथैवतंत्रयस्कं
धाएवमष्टाधिकारंज्योतिःशास्त्रमुक्तं यत्रायंत्रभगोलवासनमयः सिद्धांतआदिस्ततोहोराशा
कुनसंहितास्वरविधिश्चूडामणिर्विस्तरः सामुद्रोथकुमारकोबालमितानष्टाधिकारानजगुर्दैवज्ञाः
परमेष्ठिसूर्ययवनाः केमेघमालाजगुः तत्रसंहितास्कंधभेदाः तत्रसौरसावनचांद्रनाक्षत्रादिमान
संवत्सरवर्षादिफलमवधिग्रहचारग्रहणेचरफलग्रहशांतिस्नानदानादिनिरूपण ग्रहसमाग
मअर्घकांडदिव्यभौमांतरिक्षविघातकलक्षणखंजनशांतिकर्मविभागपुरुषस्त्रीगजाश्वादिल
क्षणपंचांगादिसहस्रनिरूपणजातकर्मादिसंस्कारकालनिरूपणवास्तुविद्याविजययात्रादेवप्रति २

Acc. No. ~~2354~~ M1473
Title - जातकपद्धति (केशव टीका) (संपूर्ण)
~~Author~~ - केशव.
Date - शक 1728.
Subject - ज्योतिष्य.
folio - 38 (1 No. ची folio गहाळ)
Xerox - 38

Checked 2012

KKSU LIBRARY RAMTEK 441 106 M-1473 Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षादिमुहूर्तनिरूपणं बाह्याभ्यंतरस्वरवशान्नानाशुभाशुभकथनं ह्यडुभयसेनाशुभ्रकोटयुद्ध
के विमुखादिभूबलादिनिरूपणं स्वरशास्त्रे नानाप्रश्ननिरूपणं इत्याद्यनेकभेदाः संहितास्कं
धे तथा सूत्राभिधाने गणितस्कंधे किमित्याह भास्कराचार्यः त्रुट्यादिप्रलयांतकालकलना
नप्रभेदः क्रमोच्चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा चोत्तराः भूधिष्ण्यग्रहसंस्थितेश्च कथनं
यंत्रादियं चोच्यते सिद्धांतः स उदाहृतोऽत्र गणितस्कंधप्रबंधे बुधैः अथ होरास्कंधे स्थलराशिस्व
रूपग्रहदृष्टिग्रहबलाबललग्नादिद्वादशभावबलाधनजन्मफलरिष्टारिष्टभंगायुर्दायोपदशांत
र्दशारिष्टराजयोगनाभसयोगकारकयोगदुष्टयोगआयुर्दायनिर्याणयोगनष्टजातकादिना
नाभेदहोरास्कंधे एवं त्रिस्कंधज्योतिःशास्त्रं एतद्वेदांगं किल वेदास्तावद्यज्ञकर्मप्रवृत्ताय
ज्ञाः प्रोक्तास्ते तु कालाश्रयेण शास्त्रादस्मात्कालबोधो यतः स्याद्वेदांगत्वं ज्योतिषं चोक्तमस्मात्

२ वेदांगानि शब्दशास्त्रं मुखं ज्योतिषं चक्षुषी श्रोत्रमुक्तं निरुक्तं च कल्पः करौ या तु शिक्षाऽस्य
वेदस्य नासिका पादपद्मद्वयं छंद आद्यैर्बुधैः षडंगमध्ये ज्योतिःशास्त्रं मुख्यं अंगं वेदस्य चक्षुः किले
दं स्मृतं ज्योतिषं मुख्यता चांगमध्येऽस्य तेनाच्युते संयुतोऽपीतरैः कर्णनासादिभिश्चक्षुषांगे
न हीनो न किंचित्करः एतद्वेदांगत्वाद्ब्राह्मणैरेवाध्येतव्यं तस्माद्द्विजैरध्ययनीयमेतत्सु ऽपर
हस्यं परमं च तत्त्वं ज्योतिषं वेत्ति नरः स सम्यक् धर्मार्थकामान्लभते यशश्च एतदुष्टस्येन कथ
नीयं दिव्यं ज्ञानमतींद्रियं यदृषिभिर्ब्राह्मणे विशिष्टैर्द्विजैः पारंपर्येण तस्माद्धस्त्य मवनानीतं प्रका
श्यं ततः नैतद्देयं खलाय दुर्जनाय दुराचाराचितावासिनां स्यादायुःसुहृत्क्षयो नु निंद्यता च
मानिमानुभूतः एवं यज्ज्योतिःशास्त्रविदस्ते होराशास्त्रविदो भवत्येव तेषां ज्योतिर्विदा
ध्यातये जातकपद्धतिं कुर्वेति संबंधः अत्र जन्मसमयः स्पष्टः सूक्ष्मो ज्ञातव्यः कैः यंत्रैः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घरात्रांकुचक्रफलकादिभिः अथचजन्मसमयेग्रवेदाः स्फुटाः केघाः तेग्रेवदाःयस्मिन्पक्षेघटं
नेतथासुगणकेनवेद्याः एतदुक्तंसूर्यसिद्धांते शास्त्रमाद्यंतदेवेदंयत्पूर्वंप्राहभास्करः युगानां
परिवर्तनकालभेदोत्रकेवलं वासिष्ठोपि इत्थंमांडव्यसंक्षेपादुक्तंशास्त्रंयथोत्तमं विशस्तीरवि
चंद्राद्यैः भविष्यतियुगेयुगे विशस्तियंविश्वंसंनंसिथिलत्वमितियावत्ततोनक्षत्रग्रहयोगोदृष्या
दिकंवर्त्तमानकालेयस्ययस्यग्रहस्ययस्मिन्यस्मिन्पक्षेघटंतेप्रत्यक्षमाकाशेदृश्यंते तथागणि
तयुक्त्यागणकेनग्रहाःसाध्याःतेग्रहाः मयाइदानींवर्तमानघनामवलोक्यसाधिताः तत्रसौरःसू
र्यः चंद्रःसौरात्पंचकलोनः चंद्रोच्चअत्मागुरुःआर्यपक्षजः शुक्रचलोच्चब्रह्मार्यमध्येशनिः
आर्यपक्षात्संचभागाधिकः राहुःआर्यजः सर्वेषांस्पष्टीकरणंआर्यमेव ततस्तात्कालिकोर्क

४ यनभागयुक्तस्तादिकाराले रुदयोनामलग्नं साध्यंसउदयः सषड्भइतितल्लग्नंराशिषट्कयुतंअ
स्तर्क्षंअस्तलग्नंभवति लग्नंअस्तलग्नमिति भावद्वयमुक्तइदानीं द्वादशभावसाधनायोदेमध्यलग्न
साधनाल्लग्नसाधनंततोन्नज्ञानपूर्वकमाह रात्रेःशेषमितंयुतंदिनदलेनाह्नोगतंशेषकंविश्लेष्य
स्वलुपूर्वपश्चिमनतंत्रिंशाच्युतंचोन्नतम् यत्सूर्वोन्नतषड्भयुक्तरवितःपश्चान्नतादित्यतोयल्लंकोद
येकेभ्वलग्नमिदंतन्माध्यंसषड्भंसुखं २ रात्रेःशेषमिति रात्रेःशेषमितंयत्घटिकादिकंरात्रेः
शेषंगतंचयत्घटिकादिकंतदिनदलेनयुतंसत्क्रमात्पूर्वपश्चिमनतंस्यात्तद्यथा अर्द्धरात्रादुपरि
रात्रिशेषंदिनदलेनयुतंसत्रात्रौपूर्वनतंस्यात् अर्द्धरात्रात्पूर्वरात्रिदलंदिनार्द्धेनयुतंसत्रात्रौप
श्चिमनतंस्यात् अन्हःगतंशेषकंचदिनदलेनविश्लेष्यंविश्लेषितंदिनदलाच्छोधितंसत् ४

(३

के.टी. दिवसे पूर्वनतं स्यात् दिनार्द्धादुपरि दिनशेषं दिनार्द्धेन विश्लेष्य दिनार्द्धशोधितं सत् दिने पश्चिम
नतं स्यात् तन्नतं त्रिंश ३० च्युतं त्रिंशतः शुद्धं उन्नतं स्यात् तद्यथा पूर्वनतं त्रिंशच्युतं पूर्वोन्नतं
स्यात् पश्चिमनतं त्रिंशच्युतं पश्चिमोन्नतं स्यात् यस्तु पूर्वोन्नतेति पूर्वोन्नतषड्गुणकरावतो लग्न
मिव लग्नवत्साधितं यद्भवति तन्मध्यमध्यलग्नं स्यात् पूर्वकपाले उन्नतं पूर्वोन्नतं षड्गुणकरविः
पूर्वोन्नतं च षड्गुणकराविश्य पूर्वोन्नतषड्गुणकरवी नाभ्यामितिपस्यार्थे तस्य पश्चान्नता दिस्यतो
लंकोदयैः लग्नवत्साधितं मध्यलग्नं स्यात् पश्चान्नतं च आदित्यपश्चान्नताद्द्वैरोलाभ्यां पंच
म्यर्थे तस्य एतदुक्तं भवति अर्द्धरात्रादुपरि दिनार्द्धपर्यंतं पूर्वकपाले उन्नतं इष्टकालम कल्प्य स
षड्गुना कालिका कस्मूर्यं प्रकल्प्य लंकोदयानुदयान् प्रकल्प्य तद्भोग्यभागेरुदयइत्यादिक्रमेण
लवादिकं यत्साधितं तन्मध्यलग्नं स्यात् दिनार्द्धादुपरि रात्र्यर्द्धपर्यंतं पश्चिमकपाले पश्चि

५ मनतमिष्टकालं प्रकल्प्य केवलं नाक्षकालरविं सूर्यं प्रकल्प्य लंकोदयानुस्वोदयान् प्रकल्प्य तद्भोग्य
भागेरुदयइत्यादिना लग्नवत्साधितं तन्मध्यलग्नं स्यात् तन्मध्यलग्नं षड्राशिषड्युतं सुखं पाताल ल
ग्नं स्यात् एवं भावचतुष्टये सिद्धे तदंतराले अष्टभावसाधनं उपचयापचयात्मके ग्रहभावफलसाधनं
चाह अंत्योव्यस्तखभस्य भूयमहतो योज्यस्तनोर्द्विच्युतो बंधोते पि च सांगभास्ततुसुखाः संधि
र्द्वियोगोर्द्धितः अन्यसंधिषु भावयोगे खिलं स्याद्भावसंध्यंतरे एतत्संसंधिखगांतरं क्षयचये भावाधि
के स्वे खगे ५ व्यस्तखभस्य त्रिंशात् इति विगतं अस्तं समस्तभं यस्मात् तद्व्यस्तं व्यस्तं च नत खं भं च
खं नाम मध्यलग्नं व्यस्तखभस्य च अंत्याः लताद्योरात्र्यो द्विधाभ्यां पतितः रात्रिध्यायः शोधितं त
नौ लग्ने बंधौ चतुर्थस्थाने क्रमेण योज्यः तद्यथा व्यस्तखभस्य त्र्यंशो लग्ने योज्यः स द्विपतितस्य
तुर्थभावो योज्यः भू १ यम २ हतः एकद्विगुणः तनौ लग्ने योज्यः एकत्र एकगुणः अंत्यो लग्ने यो ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

के॰ टी॰ ज्योऽन्यत्र द्विगुणो योज्ये स्यर्थः एवं द्वितीयतृतीयभावोस्तः स ग्रंथतो द्विच्युतो द्वाभ्यां शोधितः भूय महतो वंशो योज्यः एकगुणे एतत्र चतुर्थभावे देयो न्यत्र द्विगुणे देयइत्यर्थः एवं पंचषष्ठभावोस्तः एवं लग्नादि षड्भावाः जाताः तेषड्सांगभा राशिषट्कयुक्ता जायादयः षड्भवंति एवं द्वादशभावाः स्युः संधि द्वियोगे र्द्धितः द्वयोर्भावयोर्योगार्द्धितः संधिः स्यात् एवं सर्वेषां द्वादशसंधयस्युः अत्र भावद्वय योगकरणे चक्राधिकतायां चक्रेन त्याज्यं तथा प्रथमभावे एकादशभानि स्युः अथ भावे पूर्णं स्यात् पू र्णं भावे द्वादशांशं संग्रहं शून्यं संधिष्विति संधिषुगते ग्रहे फलं शून्यं स्यात् भावगे ग्रहे अर्थादखिलं फ लं स्यात् भावगे भावसमे ग्रहे संपूर्णं रूपफलं स्यात् अंतरे अनुपातः संधिखगांतरं भावसंध्यंत रेणाप्तं सत् ग्रहस्य भावफलं रूपादिकं स्यात् भावाधिके भोवान्यूने ग्रहे पूर्वसंधिग्रहांतरं संधिभा वांतरेणाप्तं सत् ग्रहस्य भावफलं रूपादिकं स्यात् भावाधिके ग्रहे परसंधिग्रहांतरं परसंधिभावांतरे

६ णाप्तं ग्रहभावफलं स्यात् क्षयचयमिति भावाधिके ग्रहे क्षयफलं अपचयात्मकं स्यात् भावाल्पेग्र हे चयफलमिति उपचयात्मकं फलं स्यात् तस्य भावफलस्य षष्ठांशाकल्पनया ग्रहस्य तद्भावे फलं शुभम शुभं वा योज्यं इति केशवदैवज्ञकृतपद्धतेः स्वोक्तटीकायां सर्वग्रहफलजातमात्रोपयोग्या भा वाध्यायः अथ ग्रहदृष्ट्या श्रीजातकोक्तबहुनिर्णयार्थं दृष्टिफलार्थं च सविशेषग्रहदृष्टिसाधनाध्या यं वक्तैके नाह खेखाग्नि द्विखवेदरामयमभूखाश्चार्धमेकादिभे दृष्टावर्जितदस्य कस्य गुरुणा चेदष्टवेदेह ताः मंदेनांकयमेस्तजानगगुणेकाभादिज्ञा संस्कृता भाग घु क्षयर द्विखानललवे नाध्यु ४ इ लादृ भवेत् ४ खेखाग्नीति खे खाग्न्यादयः अंकाः दृष्टावर्जितदस्य कस्य एकादिभे एकराशिगे भाद्यज्ञाः भवंति तच्चैकभेंकः खं ० द्विभेंऽकः एकः त्रिभे अग्नयः चतुर्भे द्वौ २ पंचभे खं ० षष्ठभे वेदाः चत्वारः ४ सप्तभे रामास्त्रयः ३ अष्टमे यमौ द्वौ २ नवमे भूरेकः १ दशभे खं ० एकादशभे अंकं ० ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शत्त्वं द्वादशोभेऽभेत्त्वं स्वाभ्यांभ्युमित्यत्र समाहारैकवद्भावः पश्यतीति द्रष्टा तेन दृष्टा दर्शनार्हे
दृश्यः दृश्य एव दृश्यकः द्रष्टावर्जितदृश्यकस्य नैकाः स्युः चेद्गुरुणा दृष्टावर्जितदृश्यकस्य वेदभे

१	२	३	४	५	६	७	८	९	१०	११	१२	
०	१	३	२	०	४	३	२	१	०	०	०	
	श ४	मं ४	गु ४			मं ४	गु ४	श ४				

अष्टमे च दृष्टत्वाच्चत्वारोंकाः स्युः नपूर्वोक्ताः मंदेन दृष्टा
वर्जितदृश्यकस्यांकयमभे नवमे द्विभे वेदाश्चत्वारोंकाः
स्यान्नपूर्वोक्ताः असृजा भौमेन दृष्टवर्जितदृश्यकस्य न
गगुणेसप्तमेत्रिभे वेदाश्चत्वारोंकाः स्यान्नपूर्वोक्ताः ए
वं दृष्टावर्जितदृश्यकस्य भादिज्ञेयोंको भवति स भागद्युक्षयरविवान्नललवेन संस्कार्यः एतदुक्तं भ
वति राश्यादिको योंकः ततस्तत्परांके यः क्षयोयन्न्यूनं स्यात् यद्वाग्या वृद्धिर्यद्वाधिकं स्यात्तेन राश्या
धः स्या भागाः गुण्याः खानलैस्त्रिंशाद्भिः ३० भज्याः लब्धेन सः अंकः संस्कार्यः कथं परक्षेपेणहीनः

७ कार्यः परवृद्धौ युतः ततोंशुच्युतः चतुर्भिर्भक्तः सन् दृष्टिर्भवेत्   इति श्रीकेशवदैवज्ञविर
चितेस्वरचितटीकायां सविवृतौ षड्दृष्टिसाधनाध्यायः   अथ ग्रहाणां बलाबलज्ञानं विना सर्वत्र जात
कोक्तफलनिर्णयं दशाक्रमादिनिर्णयं च कर्तुं न शक्यते ततो बलसाधनाध्यायो आरभ्यते तद्बलं स्था
नदिक्कालनैसर्गचेष्टादृष्टिभिः षड्विधं तत्र स्थानबलं पंचधा उच्चबलं सप्तवर्गबलं समविषमरा
शिनवांशबलं आदिमध्यांत्यद्रेष्काणगतपुंनपुंसकस्त्रीग्रहबलं केंद्रादिगतग्रहबलं एवं पंचधा
स्थानबलं दिग्बलमेकधैव कालबलं चतुर्धा दिनरात्रिबलं दिनरात्रित्रिभागेषु बलं स्वहोरादि
नमासाब्दबलं पक्षबलं नैसर्गमेकधैव चेष्टाबलं आयनबलं चेष्टाकेंद्रं च कदाचिज्जन्मका
ले ग्रहो समकलो सदा बलस्य क्षयवृद्धी यासचेष्टाबलभेदश्च दृग्बलमेकधैव एवं पंचदशधा ग्रह ७
बलं तत्रादौ स्थानबलभेदेषूच्चबलं सप्तवर्गबलं चाह   नीचोनो भगणाच्च्युतः षडधिकश्चेष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्टोच्चबलं स्वर्क्षे ईसमभे ष्टमस्त्रिचरणा मूलत्रिकोणे बलं मित्रर्क्षे ध्रिरधी छ भेचयद्भांत्रावैरिभेष्यंत्रा
कौ दंतांत्रा ध्यरिभे ग्रहादिपवत्राल्खेटस्य सप्तसैक्यजं ५ नीचोनाऽ र्धोन्कुत्रश्चेत्षडधिकः षड्भाधिकः तर्हि
भगणाच्च्युतश्च। क्राच्छोधितः चे सुङ्गादल्पस्तर्हि यथास्थित एवेसर्थो सिद्धं सराश्याधिकः षट्चलप
द्भमकः कार्यः औच्चबलंउच्चबलस्यात् यदिनीचोनग्रहस्य संपूर्णाः षड्राशयः तथा षड्भक्ताः पूर्णरूप
बलंस्यात् यदाष ड्योल्लास्तदारूपस्थाने प्रथमं शून्यं गाद्येन द्वादशयाद्यषष्ठ्यांशुल्यं विकलास्था त्त्वशरेण
पनीत्वाष ड्भिर्हृत्वा लब्धं शून्याधः षष्ट्यंशो लेख्याः तदधिषष्ट्यंशा स्तदधो लेख्याः एवमुच्चबलं स्यात्
अथ सूर्यादीनां नीचानि   अथ सप्तवर्गबलं स्वर्क्षे ह्यामिति स्वर्क्षे स्वभवने
ग्रहे अर्धबलं ० ३० ० स्यात् समभे अष्टमांशाः ० ७ ३० मूलत्रिकोणे त्रयः
चरणाः बलं ० ४५ ० मित्रराशौ अंघ्रित्र्यचरणाः ० १५ ० अधिमित्रभे त्रयः द

र	च	मं	बु	गु	शु	श
६	७	३	११	९	५	०
१०	३	२८	१५	५	२७	२०
०	०	०	०	०	०	०
०	०	०	०	०	०	०

८ भांशाः अष्टमांशास्त्रयः ० २२ ३० वैरिभे अष्टांशाः ० ७ ४५ षोडशांशाः ० ३ ४५ अधिवैरिभे दंतांशाः
द्वात्रिंशांशाः ० १ ५२ रू स्येतिसर्वत्रार्थसिद्धं ग्रहादिपवत्रादिति खेटस्य ग्रहादसप्तवर्गवशात् सप्तवर्गाधि
पत्योयथास्थानोक्तानि स्वर्क्षे ई मित्यादीनि सप्तबलानि ग्राह्यानि तेषां सप्तानां ऐक्यजं बलं भवति ग्रहोय
स्मिन्गृहे स्थितः तद्गृहस्वामिनः स्वक्षिधिपुक्तबलं ग्राह्यं एवं होरादिस्वामिनां ग्राह्यं तदैक्यं तस्य ग्रहस्य सप्तवर्ग
जबलं भवति अत्र केचन पाहो ननु बलं त्रिकोणगृहादिमिति ग्रहस्य गृहस्थानादेवाष्टमबलं गृह्णन्ति तदु
क्तं सप्तवर्गजमिति सप्तसंख्या नियमात्   अथ स्त्रीराश्यादिगतग्रहबलं तथा केंद्रादिगतग्रहबलं तथा
द्य मध्यमांत्य द्रेष्काणगत पुनपुंसकस्त्रीबलेचाह   शुक्रेंदू समभांशके हि विषमेऽन्ये दद्युरंघ्रिं बलं केंद्रा
द्येषु चरूपकार्द्ध चरणान्यद्येति खेटाः क्रमात् स्त्रीक्लीबनराः प्रथमके ह्लौ बोचमध्ये तथा द्रेष्काणेवि
चरंति पादमुक्तं स्यात्स्थानवीर्यं त्विदं ६ समभे च नेवा स्थितौ शुक्रेंदू अंघ्रिरूपांघ्रिं बलं ददतां विषम
भेराके वा अन्ये रविभौमगुरुसेषा अंघ्रिं बलं दद्युः भं च अंशाश्च भांशाः मिसतदुई कवलत्र ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कें.टी.

समंचतद्ग्रोत्राक्ंतस्मिन् लमंस्त्रीभवनं विषमंपुरुषभवनं अत्रथापतिपद्धतिटीकाकारेण अंत्रोमुख्य
त्वमुक्तंतदसत् यतःसर्वेषांजातककाराणांमतंनस्यात् उक्तंचलघुजातके चंद्रसितौस्त्रीक्षेत्रेपुरुषक्षे
त्रोपगाःशेषाः एवमन्येष्वपियंथेषुक्षेत्रंराशिरेव राशिसमांशस्ततोंशोपिबलंस्यात् यत्तुमुक्तंद्रेस
मभेंशेचभवतस्त्वैकपादएवबलं नचरणद्वयं अथकेंद्राद्येषुकेंद्रपणफरआपोक्लिमेषुगताःग्रहाःक्र
मेणरूपार्धचरणंचबलंयच्छंतीत्यत्रदृति तद्यथा केंद्रगाःरूपं पणफरगाःअर्धं आपोक्लिमगाःपादंयच्छं
ति अत्रकेचिद्द्रावफलंषष्ट्यंशकल्पनयाचेशाचीकमूल्यंति तदपियुक्तं अथस्त्रीरवेटौचंद्रशुक्रौ
राशित्रितीयद्रेष्काणेस्थितौपादंबलंयच्छंतः नराःगुरुभौमार्काःप्रथमद्रेष्काणेपादंबलंयच्छंति क्ली
वौबुधशनीराशिमध्यद्रेष्काणेस्थितौपादंबलंयच्छंतः इतिपंचविधस्थानबलंउक्तं अथक
माप्राप्तंदिग्बलमाह मंदाल्लग्नमिनात्तुजाच्चहिबुकं शोध्यंविधोर्भार्गवान्माध्यंज्ञात्गुरुतोस्तमत्र

९

रसभास्सुखंसजेज्ञकतः दिग्वीर्यरसहृत्विति मंदाद्धनेश्वराल्लग्नंशोध्यं इनात्सूर्यात्तथाकुजाच्चहि
कंचतुर्थंभंशोध्यं विधोःचंद्रात्तथाभार्गवाच्छुक्रात्माध्यंदशमभवनंशोध्यं ज्ञात्बुधात्तथागुरोश्चअ
स्तंसप्तमंशोध्यं शोध्यंचेद्रसभास्सुखंषड्राश्यधिकंभवतितर्हिचक्रतश्चक्रात्सजेत् चक्राच्छोध्यं षड्राद्यल्प
अन्यथायथास्थितएव तद्राश्यादिरसहृद्दितिषड्भिर्भाज्यं अत्रभाजनविधिस्तूच्चबलानयनप्रोक्तः
सोत्रज्ञेयः इतिदिग्बलसाधनं अथकालबलमाह अथोसमयजंरूपंसदास्याह्निदृश्चिंत्राद्द
ज्ञनतोन्नतेरात्रिकुजाकीर्णांपरेषांबले ७ अथोसमयजंकालबलमुच्यते अत्रविहाबुधस्य स
दादिवारात्रौचरूपमेवबलंस्यात् त्रिंशद्घटिकेनतोन्नतेरात्रिकुजाकीर्णांपरेषामन्येषांबलेभवतः ए
तदुक्तंभवति त्रिंशद्घटिकेनतंपश्चार्धंतदेवरात्रिकुजाकीर्णांत्रयाणामपिबलंस्यात् उन्नतंत्रिं
शद्घटिकंसघल्पर्धंतदेवमपरेषांरविगुरुशुक्राणांत्रयाणामपिबलंभवति अथान्यत्कालबलभेदत्र ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यमाह शुक्लेस्यतिथिहृद्धनेष्य तिथयोवीर्यसतां भूच्युतंपापानां द्विगुणं विशोधिदमथान्तरत्र्यंशात्केषु क्र
मात् सौम्यार्कार्किभुवांनिशः । त्र्यंशेषु सितारानां च रूपं सदेज्यस्याथाब्दप्रिचयाद्बलीद्विलसमामासघुहो
रेश्वराः ८ शुक्लेशुक्लपक्षे अंत्ये कृष्णपक्षेतिथिहृत्संचदशात्हृतेष्यतिथयः क्रमेणसतांशुभग्रहा
णांबलंभवति एतदुक्तंभवति शुक्लपक्षेगताः तिथयः पंचदशहृताः कार्याः कृष्णपक्षेशेषास्तिथ
यः पंचदश्याहृताः कार्याः कृष्णपक्षेगतास्तिथयः पंचदशभ्यः शोधिताः शेषाः भवंति एतत्सतांशुभग्र
हाणांचंद्रबुधगुरुशुक्राणांबलंस्यात् एतदेवभूच्युतंरूपाच्छुद्धं पापानांरविभौममंदानांबलंस्यात् इमं
नीगतंबलंविशोध्य द्रस्य द्विगुणंकार्यंइदंपक्षबलं यथान्ह्योदिवसस्य त्र्यंशात्केषुप्रथमद्वितीयतृतीयेषुसौ
म्यार्कार्किभुवांत्र्याणांक्रमेणतथानिशोः रात्रेः त्र्यंशकेषु त्रिषु शशिसितारानां त्रयाणां क्रमेणरूपंबलंस्या
त् इज्यस्यगुरोः सदासार्वकालेषु रूपंबलंस्यात् एतदुक्तंभवति दिनस्यप्रथमेत्र्यंशेचज्ञस्यसौम्यस्य
बुधस्यबलंरूपंस्यात् द्वितीयेऽर्कभुवःशनेः रूपंबलंस्यात् रात्रेःप्रथमेत्र्यंशेचंद्रस्य द्वितीयेशुक्रस्य

१० तृतीयेभौमस्यरूपंबलंस्यात् सर्वकालेगुरोः रूपंबलंस्यात्दित्यर्थः एवंत्रिकालबलं अथव
र्षाधिपबलंअब्दप्रिचयात्सादवक्ष्यासमामासघुहोरेश्वरः क्रमात्बलीस्यात् अत्रजातकेवचनं
एतदुक्तंभवति समाधिपोवर्षाधिपो योग्रहः स्यात्तस्यैकपादोबलंस्यात् योहिमासाधिपस्तस्य
पादद्वयंरूपार्धंबलंस्यात् योदिनाधिपोवारस्तस्यपादत्रयंपादोनरूपंबलंस्यात् योहोराधिपः का
लहोराधिपःस्तस्यपादचतुष्टयंरूपंबलंस्यात् दिनपतिकालहोराप्रसिद्धौवर्षमासपयोरानय
नायश्लोकोमयोक्तः द्विस्थोघ्नपिंडोरदभूः १३२युतोर्कः १२युकुरवाग ग्नि ३६० हृत्सवाग्नि ३० हृत नः फ
लेयुतेवेदैर्गुणैः ४ ३स्त्रि द्विः ३ २हृतेद्वि ७शेषकेऽर्कोद्ध्यतुल्येकरणेद्वमासपो इतिब्रह्मघ्नपिं
उद्धृतिअत्रसंक्षेपेयं एवंचतुर्भेदकालबलमुक्तं अथाद्विविधंचेष्टाबलंतत्रैरमायनबलंभुजंग
प्रयातेनाह सदाक्रांतिभागैर्युताद्यस्यासिद्धः २४ त्रांनीहृद्युतोनाः क्रमाद्याम्यसौम्यैः विलोमंपरे १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

के.टी. पां गता भो धिभक्ता ४८ भवेदायनं वीर्यमर्कस्य दृष्टं ९ तस्य बुधस्य क्रांतिभागैः सदैवेति याम्यैः
सौम्यैः वा लिप्ताः चतुर्विंशतियुक्ताः एवं कार्याः शनीन्द्वोः क्रांतिभागैः याम्यसौम्यैः क्रमाद्युतो
नाः सिद्धाः कार्याः याम्यैर्युक्ताः सौम्यैरूनाः इत्यर्थः परेषामपरेषां रविकुजगुरुभृगुकाणां विलो
ममिति एतेषां याम्यैः क्रांतिभागैः सिद्धाः २४ ऊनाः कार्याः सौम्यैर्युताः कार्याः एवं ते सर्वे ग
जांभोधिभक्ताः अष्टचत्वारिंशद्भक्ताः ४८ तेषां सर्वेषामायनबलं स्यात् एतदागतं सूर्यस्य द
ग्रं द्विगुणं कार्यं एतदायनबलं कैश्चिच्छरसंस्कृतक्रांत्योक्तं तदसत् यतो ग्रहस्य याम्योत्तराभिमु
खेन अयनं गमनं क्रांतिवशादेव न शरवशात् यतो ग्रहस्य शरः क्रांतिसूत्र एव न पृथक्कृअ
लो ग्रहस्य मुखवलनं क्रांतिवशादेव तदुक्तं भरतात्मबंधेन सिद्धांतसिरोमणौ वलनानयने क्षे
पो क्षिप्तो यैस्तेनेति बुद्ध्य इति एवं आयनबलसाधने क्रांतौ शरसंस्कारो नास्तीति सद्युक्तिः

१२ दृक्सायनबलं अथ मुख्यं चेष्टाबलमाह मध्यस्पष्टविवरार्द्धहीनदलभाक्स्वध्योनचोच्यं कुजात्कें
द्रं चेद्भगणाच्च्युतं षडधिकं षड्भक्तं चेष्टाबले मध्यात्तत्कालात्स्पष्टे विवरार्द्धं तन्नीस्पष्टविवरार्द्धहानी
तयोर्दलं स्पष्टविवरार्द्धहीनदलं तद्युक्तं तद्दलभाक् स चासौ मध्यश्च दलभाक्स्वध्यः तेनोनं चेत् शी
घ्रं च स्पष्टविवरार्द्धहीनदलभाक्स्वध्योनशीघ्रं कुजात् कुजभारध्यपंचानां केंद्रं चेष्टाकेंद्रं स्यात् तच्च
षडधिकं भगणाच्चक्राच्च्युतं कार्यं षडल्पमर्थाद्यथास्थितमेव षड्भक्तं च षड्भिर्भाज्यं कथं उच्चबलो
क्तरीत्या चेष्टाबलं स्यात् एतदुक्तं भवति मध्यात्तत्कालात्स्पष्टे यावद्वृद्धिर्हानिर्वा तस्याः दलं मध्य
ग्रहे कार्यं वृद्धेर्दलं मध्यमे योज्यं हानेर्दलं मध्ये देयं तेन मध्येन शीघ्रोच्चं नाम्ना प्रोच्छकेंद्रमिं कार्यं एवं
कुजादीनां शीघ्रोच्चात् प्रकेंद्रं स्यात् तस्मादुच्चबलवच्चेष्टाबलं स्यात् अत्र फलद्वयार्धसंस्कृतमध्य
ग्रहेण शीघ्रोच्चं ऊनं हतं सत् चेष्टाकेंद्रं सद्युक्तं वक्राद्युत्साद्युत्पादनकं दृश्यते तच्छीघ्रपतिपुच्छं तो १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

के·टी·

जह्यात्स्पष्टयतामिति भ्रांतिपाठः यतः सार्द्ध फलद्वयसंस्कृतमध्यग्रहोनचलोच्चं असंनमयुक्तं स्या
त् अतजह्यान्मध्यग्रहमिति पाठेन फलद्वयार्द्धसंस्कृतमध्योनं चलोच्चं सयुक्तं केंद्रं स्यात् अतए
व श्रीधराचार्येणोक्तं स्फुटश्चेछुध्यतेमध्येन छेषार्द्धं धनंचले स्फुटे वाशुद्ध्यतेमध्येन छेषार्द्धं क्ष
यो भवेत् १ ततोमध्योनतेहृत्वा चक्रार्द्धादधिकं यदि संशोध्यो भगणात्तस्मात् षड्भिश्चेष्टाबलं स्मृ
तात् अथदामोदरपद्धतावपि स्फुटमध्यमयोरैक्यदलितं तद्यो धयेच्चबलात् चेष्टाकेंद्रमिति
इति द्विभेदं चेष्टाबलं अथनैसर्गिकबलमाह स्यादेकोत्तररूपमद्रिहृतं नैसर्गिकं स्याद्बलं
मंदारज्ञसुरेज्यशुक्रेरानाम्नीक्ष्णद्युतीनां क्रमात् १० सप्तसु कोष्ठेषु एकोत्तररूपं सप्तभि ७ र्विहृतं स
त् मंदादि सप्तग्रहाणां क्रमात् बलं स्यात् अथकदाचिद्विशेषमाह युद्धे बाणवियोगहृच्च
खेचरयोर्वीर्यैक्ययोरंतरं स्वं सौम्यस्थबले क्षयं च यमदिक्संस्थ च कुर्याद्बले यदाकदाचिज्जन्म

योरं २

१२ काले ग्रहयोर्युद्धं भवतीति समकलो ग्रहौ तयोः कलात्मको बाणो सा ध्योन थातयोः पूर्वोक्तानां निजा
नां बलानामैक्ये योगो कार्यौ तयोर्वीर्यैक्योंतरेण हृते कार्य यल्लब्धं तेनोत्तरादक्षस्यस्य ग्रहस्य बल
सहितं दक्षिणस्थस्य बलहीनं कार्यं अथकदाचित्संस्कारश्चेष्टाबलभेदः अत्र दृग्बलमाह
सदृष्टयांघ्रियुगुग्रदृष्टिचरणोनं खेटवीर्यं भवेदिति खेटवीर्यं सदृष्ट्यंघ्रियुक्कार्यं उग्रदृष्टि
चरणोनमिति पापग्रहदृष्टिचरणोनं कार्यं एतदुक्तं भवति यं ग्रहं प्रतिग्रहाणां पापक्रूरदृष्ट
यः आगतास्तत्र शुभग्रहदृष्टिचतुर्थांशेनतस्य ग्रहस्य बलं युक्तं कार्यं पापग्रहदृष्टिचतुर्थांशेन
हीनं कार्यं इति दिग्बलं इति षड्बलमुक्तेदानीं भावानां बलमाह भावानां बलमीशाज्ज
चन्द्रचतुष्पादांस्यकीटाबुजाः १ जायां बोधेरवभोनिताः खलुततो दिग्वीर्यवत्तद्युतं सदृष्ट्य
ङ्घ्रियुगुग्रदृष्टिचरणेनतैस्यदृग्युक्पुनः भावादीनां लग्नादीनां बलं ईशाजं स्वामिजं स्यात् १२
स्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च

कें.टी. अत्रान्यो विशेषः नृचतुष्पादेति नराशयः मिथुनकन्यातुलाधन्विपूर्वार्द्धः चतुष्पदराशयः
मेषवृषभसिंहधन्विपरार्द्धः मकरपूर्वार्द्धश्च कीटोकर्कटवृश्चिकौ अंबुजाः कर्कटमकरपरार्द्धमी
नश्च अत्रये भावाः नृचतुष्पादाख्यकीटांबुजाः राशयः स्युस्तेक्रमेण जायांबाद्यखभोनितास्ताः
कार्याः ततस्तेभ्यो दिग्वीर्यवदिति पूर्वोक्तवदुच्चबलरीत्या बलं स्यादेतदुक्तं भवति अत्रनरराशिभावा
स्तेसप्तमभावोनिताः चतुष्पदास्तेचतुर्थभावोनिताः येकीटाः तेलग्नोनिताः येजलचरास्तेदशमैर्भा
वोनिताः कार्याः तेभ्यो दिग्बलवद्यद्बलं स्यात्तेन तस्य भावस्य बलं युक्तं कार्यं तथा सदृष्टंप्रयुक्तउय
दृष्टिचरणेन कार्यं पुनर्लग्नदृग्युक्तं कार्यं एतदुक्तं भवति भावे प्रतियाः ग्रहदृष्टयः आगताः तत्रशु
भदृष्टिचतुर्थांशेन तद्भावफलं युक्तं कार्यं पापग्रहदृष्टिपादेन हीनं कार्यं पुनः सकलपाशुभदृशास
कलपरगुरुदृशाच युक्तं कार्यं भावंप्रतियाग्रहाणां पापदृष्टयः आगतास्तासां चतुर्थांशेन तद्भाव

१३ बलं हीनं कार्यमिति इति लग्नादिद्वादशराशीनां बलं ज्ञेयं अथ रश्मीष्टकष्टसाधनायार्क
चंद्रयोश्चेष्टाकेंद्रबले चाह त्र्यर्केंदुस्त्रिभयुक्तसायनरविश्चेष्टाख्यकेंद्रं तयोर्गोकष्टेष्टविधौ बलंकु
कुरु ततः प्राग्वच्च वीर्यायते १२ अत्र व्यर्केंदुश्चंद्रस्य चेष्टाकेंद्रं स्यात् त्रिभयुक्तसायनरविः राशित्र
यान्वितः सायनसूर्यः सूर्यस्य चेष्टाकेंद्रं स्यात् ततस्ताभ्यां केंद्राभ्यां बलेउं प्राग्वदुच्चबलानयन
रीत्या कुरु किमर्थं गोकष्टेष्टविधौ रश्मीकष्टसाधने तिवले वीर्यानयनवद्भवतः यदर्कस्यायनब
लं तदेव चेष्टाबलं अतश्चंद्रस्य पक्षबलं द्विगुणितं पूर्वमेवक्तं इति श्रीकेशवदैवज्ञकृतपद्
तेः स्वोक्तटीकायां बलसाधनाध्यायस्तृतीयः ३ अथेष्टकष्टदशाफलादिज्ञानार्थं इष्टकष्टाख्या
येआरभ्यते तत्रादौ ग्रहरश्मीष्टकष्टसाधनमाह येचेष्टोच्चबलेरसैर्विनिहते द्वे सैकेनिजारन्नम
ये चेष्टातुंगबलाहते पदमिहेष्टः स्याद्बलोनैकयोः घातान्मूलमिदं हि कष्टमथ तद्रूपं दशायाः फ १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

के.दी. लंवीर्यद्कूद्य गि इष्टकष्टगुणितेद्वे चेष्टकष्टाह्वये १२ अस्यार्थः ये चेष्टोच्चबलेरसैः षड्भिः निहते से
ते एकसुक्ते निजाः स्वकीयाः रश्मयो इति उच्चबलरश्मय श्चेष्टा बलाच्चेष्टारश्मयोर्यस्यग्रहस्य
बलंतस्यग्रहस्यज्ञेयाः तत्रार्कस्य चंद्रस्य च रश्म्यर्थ मिष्टकष्टार्थंच पूर्वमानीतं बलं तदेवग्राह्यं इति
रश्मिसाधनं अथेष्टकष्टं चेष्टातुंगेति चेष्टाबलतुंगबलमाहतेः पदंमूलंइष्टग्रहस्येष्टं भवति
बलेनैकयोरिति चेष्टाबलतुंगबलाभ्यां पृथगूनयोरूपयो १ र्घातान्मूलमिदं हि ग्रहस्य कष्टं भवति तद्रू
पं ग्रहस्य फलदनुसारं ग्रहस्य दशाफलं स्यात् इष्टे अधिके ग्रहस्य दशाफलं शुभं अधिकं स्यात् कष्टबलाधि
क्ये दशाफलं कष्टबलमधिकं स्यात् इष्टकष्टयोः साम्ये दशाफलं शुभमशुभं च समं स्यादित्यर्थः ग्र
हस्य वीर्यबलं इष्टेन कष्टेन च पृथक् गुणितं कार्यं तदिष्टकष्टाह्वयं बलं स्यात् इष्टबलं कष्टबलंच
ज्ञेयं अस्य प्रयोजनं ग्रहस्य शुभफलं शुभफलवशाज्ज्ञेयं अशुभफलमशुभवशाद्योज्यं

अशुभबलघातमू
१४ अन्यप्रयोजनंच सप्तवर्गशुभाशुभसाधने शुभाशुभघातमूलेन शुभं गुणयेत् इत्यानीताः ताः तस्य ग्रहस्येष्टेन कष्टे
लेन अशुभं गुणयेत् इति यत्र जातसैकवचनं इतीतियद्ग्रहप्रतिपादितो आनीताः ताः तस्यग्रहस्येष्टेन कष्टे
न च पृथग्गुण्याः ताः इष्टकष्टाह्वयाः इष्टदशाः कष्टदशाभवंति एतत्प्रयोजनं इष्टे शुभफलं चेत्तर्हि
कष्टवशात्त्याज्यमित्यर्थसिद्धिं अथ सप्तवर्गजशुभाशुभं स्वग्धरा शार्दूलविक्रीडितवृत्ताभ्यामाह
स्वोच्चेरूपं १ त्रिकोणे चरणविरहितं ३/४ स्वर्क्षगे ई १ त्र्यंशोंशका ३/४ अधीष्टर्क्षे इष्टर्क्षे युजि चरणे ः १/४
स्यात् समर्क्षेऽष्टमांशाः भूपांशा १/१६ वैरि गेहेऽष्टारिभयुजि रदांशाः १/३२ नीचे रव ० मीनादिष्टं गेहेत्त
इने कमसदलदलं षट्कार्यं तदैक्ये १४ अस्यार्थः एतत्सप्तवर्गजं फलं शुभाशुभमानात्
वर्गेशावशात् ज्ञेयं तस्मिन् ग्रहे स्वोच्चे सति रूपं बलं शुभं स्यात् त्रिकोणे स्वमूल त्रिकोणे चर
णविरहितं रूपं ० ४५ ० तस्मात् स्वर्क्षे ई ० ३० ० अधीष्टभे त्र्यंशांशकाः ० २२ ३० १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

के॰टी॰ इष्टर्क्षसुहृन्मित्रराशिगते चरणः ० १५ ० समर्क्षे अष्टमांशः ० ७ ३० वैरिभे षोडशांशः ० ३ ४५
अध्यरिभे रदांशः ० १५२ नीचे रवेश्शुभं स्यात् यत्रोच्चनीचे वा संभवति तत्रान्यन्मित्रादिज्ञं नग्रा

स्वोच्च	त्रिको॰	स्वक्षे	अधिमित्र	मित्र	सम	शत्रु	अधिशत्रु	नीच	स्वोच्च	त्रिको॰	स्वक्षे	अ॰मि॰	मित्र	सम	शत्रु	अधिशत्रु	नीच
१ १	३ ४	१ २	३ ८	१ ४	१ ८	१ १६	१ ३२	० ०	१ ० ०	० ४५ ०	० ३० ०	० २२ ३०	० १५ ०	० ७ ३०	० ३ ४५	० १ ५२॥	० ० ०

एतद्धेहं ग्रह स्थानं ग्रहस्वा मित्रत्वादि तु मं सेयं तद्यथा

ग्रहस्वामी यस्मिन् रवेश्चादिस्थानेऽस्ति तत्रांकं ग्रहं शुभं ज्ञेयं तद्धीनेकं तेन शुभेनऊनमेकं रूपं ग्रहे अ
शुभं ज्ञेयं तद्यथा अथ षट्स्थिति होरादिषट्सु वर्गेषु दलमिति ग्रहवशागतयोः शुभाशुभयोर्दलं ज्ञेयं
तद्यथा होरादिलग्नस्वामी यस्मिन् रवेश्चादिभेऽस्ति तदुक्तं शुभं ग्राह्यं तद्रूपाच्छुद्धं अशुभं स्यात् त

सिंहे त्रिकोणमपरं त्रिकोणमपरं स्वभवनमर्कस्य उच्चं भागत्रितयं स्यादथ परं दोः स्यात्त्रिकोणमपरं त्वाः

१५ योः शुभाशुभयोर्दले होरादिषड्वर्गेषु ग्राह्ये एवं सप्तवर्गोत्सन्नानां शुभाशुभानामैक्यं शुभानामैक्यं
च एवं तदैक्यं कार्यं तेन तस्य शुभाशुभाख्यैस्तः अत्र स्वोच्चमूलत्रिकोणस्वगृहाणां त्रयाणां द्वयो
र्वा संभवे सति कल्याणवर्मा निर्णयमाह विंशतिरंशाः १ द्वादशभागा मेषे त्रिकोणमपरं स्वभं
च भौमस्य उच्चफलं कन्यायां बुधस्य तुंगांशकैः सदा चिंत्यं २ परतस्त्रिकोणजातं पंचभिरं
शैः स्वराशिजं परतः दशभिर्भागैर्जीवस्य त्रिकोणं धनुषि तत्परं स्वगृहं ३ शुक्रस्य चाति
थयोंशास्त्रिकोणमपरं स्वभं तुलायां तु कुंभे त्रिकोणनिजभे रविजस्य रवेर्यथा सिंहः
४ अथ विकर्तव्यमाह पंक्त्योः सप्तसु कोष्ठयोः प्रथमयोरिष्टासदैक्यं दलतो प्रस्थाप्य भद
लादिषट्सु च तदर्द्धं वर्गपानाएथक् स्वोनंत्यासदसद्युली निजनिजतन्निघ्नद्दृष्टाशुभे
वर्गेष्टतस्य खगो जसोसदसदोर्घातो सदघ्नेस्फुटे १५ अस्यार्थः पंक्त्योः सप्तसु कोष्ठयोः १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सप्तसु कोष्ठाययोस्तेसाससु कोष्ठेतयोः पंक्त्योः प्रथमयोरर्था कोष्ठयोर्ग्रहस्य शसैदं क्येष्ठा ४ से स्थाप्य
ते अर्था ग्रहस्थाने तदर्द्धं शेषेषु होरादीनां षट्सु कोष्ठेषु पंक्तिद्वये स्थाप्ये ऊर्ध्वपंक्तौ शुभं अधरपंक्तौ
अर्द्धं स्थाप्य ततो ग्रहादिस्वामिनो स्वस्ववर्गेश्वरस्वत्रोनस्वोच्चोनल्पमित्यादिराश्युभाशुभे क्येका
र्ये ताभ्यां स्वीय स्वीयाभ्यां स्वस्ववर्गस्थं शुभाशुभं गुणयेत् ततो वर्गेश्वरे स्वेगोजस्तोः सप्तस
तोर्घातात्पदंद्ये स्फुटेस्तः एतदुक्तं भवति ग्रहादिवर्गेषु स्थितो यो ग्रहः स तेस्य ग्रहः सग्रहादिवर्गेय
त्रासित हृर्गस्य स्वामी वर्गेश्वरो वर्गेश्वरः तयोः शुभवीर्ययोर्घातात्पदं तेन स्ववर्गस्थशुभं गुणनीयं व
र्गेश्वरतस्य ग्रहयोरशुभबले घातमूलेन स्ववर्गस्थमशुभं गुणयेत् तत्स्थग्रहगृहेश्वरयोरुक्तव
न्मूलेन गृहस्य तं गुणयं तत्स्थग्रहहोरेश्वरयोरुक्तवन्मूलेन होरास्थं गुणयं एवमन्यवर्गस्थं च एवं
मसर्ववर्गजं शुभाशुभं चस्यष्टं भवति एतद्दृगणान्यग्रहस्य ग्रहादीनां शुभाशुभं फलं योज्यं वर्गफलं शु

१६ भंतर्हितहृर्गशुभवशात्तत्स्येयं अशुभमशुभवशात्तत्स्येयं इति श्रीकेशवदैवज्ञविरचित स्वविरचि
तटीकायां स्फुटतरेष्टकष्टसाधनाध्यायः ॥ अथायुर्दानं विना दशाविभागेन ज्ञायते जंतोः कि
मितं जीवितमिति च न ज्ञायते ग्रहाणां यत्किंचित्सर्वं फलं दशास्वेव भवति इति प्रधानत्वादायुर्दा
यो आरभ्यते स आयुर्दायो द्विविधः ग्रहयोगयोगोत्पन्नः गणितश्च ग्रहयोगजस्त्रिविधः नियतायुर्दा
य परमायुर्दायोऽमितायुर्दायश्च गणितश्चतुर्विधः अंशोद्भवः पिंडायुर्निसर्गिको जीवशर्मोद्
तश्चेति तत्राद्येयोगायुर्दायभेदस्यामितायुर्दायस्यैकमुदाहरणमाह ककीं द्वीज्ययुतोदये
बुधसितौ केंद्रे त्वरी त्वेतरे राशुर्विध्यमितं हियोगजनितं वान्यत्रोच्यते ऽत्रोन्मितं इंदुश्चेद्इज्यश्च इंद्वीज्यौ
कर्किणि इंद्वीज्यौ ककीं द्वीज्यौ कर्किलग्ने द्वीज्याभ्यां युतश्चासाउदयश्च तस्मिन् कर्कलग्ने चं केंद्र्याविस्य
र्धः बुधसितौ केंद्रे भवतः त्रयश्च आरश्चइत्ताश्चत्रारात्ताः अरातेषु इतरस्त्वरौ सेतरारेतेः त्रिसंस्था १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

के·टी· यास्तनीयस्थानंअरिनाशेनषष्ठं ईशाशान्वेनैकादशोइतरेपापग्रहारविभौममंदास्ते एवंसप्तग्र
हाणांयोगे अमितमगणितमायुर्दिशन्ति ज्ञानीत्यर्थः अत्रअस्यांजातकपद्धतौउक्तमितगणितायुरुच्य
ते अथांशायुःसाधनायोच्चचेष्टागुणैततःस्फुटगुणमाह अल्पाश्चेत्किरणाःसरूपकिरणांघ्रि
श्चेत्त्रयोर्ध्वाविभूगोर्द्धचेष्टिकतुंगसंभवगुणौतद्घातमूलंस्फुटः १६ चेत्किरणास्त्र्यल्पास्त्रि
भ्योल्पास्तर्हि सरूपेकिरणांघ्रिः रूपेसहिताःसरूपाः सरूपाश्चते किरणाश्चतेषामंघ्रिश्चतुर्थां
शः गुणः स्यात् चेत्त्रयोर्ध्वाः किरणास्तर्हि विभूगोर्द्ध विगताभूरेको येभ्यस्ते विभवः विभवश्चते
गावश्चतेषामर्द्धगुणः स्यात् एवंचेष्टिकतुंगसंभवगुणौस्तः किरणेभ्योभवश्चेष्टिकः तुंगकिर
णेभ्यः संभवोयस्यसतुंगसंभवः चेष्टिकश्चतुंगसंभवश्चचेष्टिकतुंगसंभवौतौचतौगुणौचचे
ष्टिकसंभवगुणौस्तः तद्घातमूलंस्फुटगुणः स्यात् तयोश्चेष्टोच्चगुणकयोर्घातस्यमूलंस्फु
टगुणकः स्यात् एतद्गुणसाधनंश्चेष्टाफलविनाकृतं अथाश्रयगुणकमाह यःस्वाधीष्ट

७ सुहृत्समार्यधिरिपुर्वर्गे ध्नतिश्चेखिलार्कविश्वांकेषुगुणगृहे द्विगुणतायोगः क्रमात्त्रंहरेत् तद्धेषट्वसुगोंशु
मध्नतिजिनैः षट्घ्नैश्चवर्गोत्रमस्वांशाश्रेशागतेसुहृत्सगुणैः स्याद्दाश्रयाख्योगुणः ७ अस्यार्थः
स्वादीनांषण्णांवर्गेक्रमाद्ध्नतिश्चेत्यादिषडंकाःक्षेप्याः स्वश्चअधीष्टश्चसुहृच्चसमश्चअरिश्चअ

वर्गाश्च	स्व	अधिमित्र	मित्र	सम	शत्रु	अधिशत्रु
एतद्धेयांका	१८	१५	१२	९	५	३
गृहे	३६ ३६	३० ४८	२६ ५४	१८ ७२	१० १०८	६ १४४

धिरिपुश्चैषांसमाहारोऽधिरिपुस्तस्याधिरिपोः स्वस्यवर्गे ध्न
ति १८ रष्टादश अधीष्टस्यवर्गे इखिलाः पंचदश १५ सुहृ
द्वर्गे विश्वे १३ त्रयोदश समवर्गे अंकाः ९ अरिवर्गे इषवः
पंच ५ अधिरिपुवर्गे गुणास्त्रयः ३ एवमेतेषांहोरादिवर्गएते
अंकाः स्युः गृहे गृहस्थानेयोऽकोलवदागच्छति स द्विगुणि
णितोग्राह्यः एवंसप्तवर्गेषुस्वादिस्थानात् आगताः सप्त अंकाः ग्राह्याः परंतु गृहांकस्तु द्विगुण एव
ग्राह्य इति पूर्वोक्तं तेषां सप्तानां योगस्तद्योगः स्वादीनां षण्णां तद्धेतरस्येयहस्य भे गृहे सति क्रमादेतैः ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

के॰टी षड्भिरंकैः वक्ष्यमाणैः षड्गुणैर्हरेत् स्वस्यगृहे षड्भिः षड्घ्नैः ३६ अधोच्चगृहे वसुभिः षड्घ्नैः ४८ सुहृद्गृहे गो
भिर्नवभिः षड्घ्नैः ५४ समगृहे अंशुमद्भिर्द्वादशभिः षड्घ्नैः ७२ अरिगृहे धृतिभिरष्टादशभिः षड्घ्नैः
१०८ अधिरिपुगृहे जिनैः चतुर्विंशतिभिः षड्घ्नैः १४४ क्रमेण हरेत् इत्यर्थः वर्गोत्तमे स्वांशे स्वनवां
शे स्वत्र्यंशे स्वद्रेष्काणे गते यग्रहे सति सदैव रसगुणैर्हरेत् षट्त्र्यंशाद्भिर्हरेदित्यर्थः स्वादिग्रहगणत
हरणेत्यर्थः एवं हृते लब्धमाश्रयाख्यो गुणः स्यात् अथाश्रयगुणके विशेषसंस्कारं तथा कर्म
थाश्रयगुणके विशेषसंस्कारं तथा कर्मयोग्यगुणकं चाह शुभांगाश्रयात् चेद्वर्गोत्तमपूर्वगोऽध्यरिसुहृद्गेन
गृहांका त्रिषड्लब्धोनो युगरिष्टभेऽब्धिनवका ९४ स्याच्चेत्समभे केवलः कार्यस्त्वाश्रयकः सततस्फु
टहृते मूलं स योग्यो गुणः खेटानां च तनोर्लवाः खयुगहृच्छेषा इहांशायुषाः १८ अस्यार्थः वर्गोत्तम
पूर्वग इति वर्गोत्तमादिषु त्रिषु वर्गोत्तमस्वनवमांशस्वद्रेष्काणे गतो यग्रहश्चेदधिरिपो अधिसुहृद्गेन च भवं

१८ ति तदा तद्गृहांकात् त्रिषड्भक्ताद् इलत् त्रिषष्टिभक्ताल्लब्धाः क्रमेणोनयुक् कार्यः तत्रापि वैरिभे उनः अधि
मित्रभे युक् पूर्वानीत आश्रयगुणकः कार्यः अरिभे शत्रुभे यग्रहे सति इष्टभे मित्रभे च ग्रहे सति तद्गृहांका
दब्धिनवका ९४ स्यात् क्रमेणोनयुक् पूर्वानीत आश्रयगुणकः कार्यः स्वभे समभे च केवलो यथास्थि
त एव वर्गोत्तमादिषु त्रिषु ग्रहे सतीति संचित आश्रयगुणकः कार्यः नान्यथा तत्स्फुटहृते मूलं
तस्याश्रयगुणकस्य प्रागानीतस्फुटगुणकस्य हृते यातमूलयोग्यः कर्मयोग्यगुणकः स्यात् अथखे
टानां सूर्यादिसप्तानां तनोर्लग्नस्य च लवाश्चत्वारिंशाङ्कैः शेषइहांशायुषः अंशा भवंति अथच
क्रूपातार्द्धहानिमाह षड्भाल्पसति खेचरेणान उदयेऽस्याद्यतैः खाग्निभिः ३० स्वेकाल्पेऽस्यचरवाग्नि
भाजितलवैः सौम्यो निते स्वार्द्धितैः क्रूराभ्रू १ गुणएक नेह्व बहुषु त्वेकस्य बहोजसः कार्यस्त हुणि
नामुरं दाजकला ध्वक्रार्द्धहानिस्त्वियं ४ १९ अस्यार्थः खेचरेणोदये लग्ने षड्भाल्पे सतिइ १८

17

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

के.टी. यंहानिर्नान्यथा अस्यखेचरोनितोदयस्यषड्गाल्पस्यांशोरुद्धैः खाग्निभिः पापग्रहेनेलभेसति
अर्धिताः नकार्याः तेनैवद्रूनाभूर्गुणः स्यात् सौम्यग्रहेतुअंशोध्नैः खाग्निभिः अर्धितेरूनाभू
गुणः स्यात् आर्धितैरेवद्रूनाभूरितिरूपमूनंकार्यंगुणः स्यात् खेचरोनउदयेएकाल्पेसतिअस्य
खेचरोनउदयस्यलवैः खाग्निभाजितैः द्रूनाभूरेकः कार्यः सौम्योनितउदयेसति अर्धितैरूनएकः
कार्योगुणः स्यात् एकभेद्विबहुषुग्रहेषुसत्स्विति एकभेद्वयोर्ग्रहयोबहुषुग्रहेषुवासत्सुतन्मध्येब
लिनएकग्रहस्यैवगुणः कार्यः नान्यस्य इदंसर्वेषांमतं सत्याचार्यवराहादिभिरेतदेवोक्तं हर
युतिविस्तृतायहस्यसरव्ययेस्यादित्युक्तं तदुपेक्षितंवराहादिभिः एवंयस्ययस्यगुणकोस्यघ्ने
तेनगुणेनग्राः गुणिताः निजायुरंशाप्ताः कलाः स्वायुर्दायलवोत्थाः कलाः कार्याः एवमन्यत्र
गुणेनैवचकार्याहानिर्युक्ता अथवर्षाद्यंशायुर्दायमाह दायांशोत्थकलाः स्वयोग्यगुणघ्न

१९ ग्राः खाभ्रनेत्रै २०० र्हताः अंशायुर्द्युसदांसमादिकतुलनोर्दायांशाकास्याहताः दिग्भक्ताहिसमादि
चेत्तुबलवल्लग्नंतथालग्नभैस्तुल्याब्दैः सहितंहिनिघ्नराशिरुद्रागादिनोमासयुक् ५ २० दायांशो
त्थाः कलाः आयुर्दायांशानांकलाः स्वकर्मयोग्यगुणकघ्नाः स्वीयेनकर्मयोग्यगुणकेनगुणनी
याः खाभ्रनेत्रैर्हृताः २०० शतद्वयेनभक्ताः लब्धंवर्षादिमासादिकमायुर्दायोभवति अत्रायं
विधिः आयुरंशोत्थकलाः स्वयोग्यगुणकेनगुण्याः शतद्वयेनभाज्याः फलंवर्षाणि ततःशेषं
द्वादशभिर्गुणयंशतद्वयेनभाज्यंफलंमासाः ततःशेषंत्रिंशताद्विर्गुणयंशतद्वयेनभाज्यंलब्धंदिवसाः
ततःशेषंषष्टिगुणयंशतद्वयेनभाज्यंफलंघटिकाः ततःशेषेषष्टिगुणेद्विशतहृतेलब्धंपलानि
इत्येवंसमादिस्यात् ततस्तनोर्दायांशो एवमाहृताः त्रिगुणाः दिग्भक्ताः समाद्यंलग्नायुः स्यात्
अंशाधिवर्षाद्यो वर्षादिमासाद्यानयनंप्राग्वदेव अथचेल्लग्नबलवत्त्वात्तद्रूपेण्योऽधिकबलेनता १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लग्नभैस्तत्याद्बैः सहितं लग्नराशितुल्यैर्वर्षैः पूर्वानीतलग्नायुर्योज्यं ततोद्विनिघ्नद्वारहृद्भागादितो
मासयुक्कार्यं द्वाभ्यांनिहंन्यनद्दति द्विनिघ्नंद्वारैः पंचभिर्ह्रीयतेतिद्वारहृत् द्विनिघ्नचद्वारहृच्चद्वि
निघ्नद्वारहृत् तच्चतद्भागादिच ततोमासादियुक्तंकार्यं एतदुक्तंभवति लग्नस्यराश्याधः
स्थंभागाद्यंतत्द्विनिघ्नंकार्यं ततःपंचभिर्भाज्यंलब्धंमासाः ततःशेषंत्रिंशद्भिर्गुणंपंचभिर्भाज्यं
लब्धंदिनानि ततःशेषंषष्ट्यागुणंपंचभिर्भाज्यंलब्धंघटिकाः ततःशेषंषष्टिगुणंपंचभिर्भक्तंल
ब्धंपलानि एवंमासादियुक्तंपूर्वादिकंलग्नायुः कार्यं मासयुगिति सावयवमासयुगित्यर्थः
अथपिंडाद्यायुर्दायस्थानार्थंआयुर्भागानयनमाह स्वोच्चोनेद्युचरोर्कभात्समधिकोग्राह्यो
ज्यक्तोनार्कभं१२ तद्भागाद्युचरोरिभेयदिगुणःत्र्यंशोनाविनावक्रगं द्यासाअस्तमितेविनाद्वा
निशितोशनिर्द्दये२ त्र्याधिकेक्राथोपिंडनिसर्गजीवगादेतेचकार्ईहानिर्भवेत् ६ २१ अस्यार्थः

२० स्वोच्चोनोग्रहोगंभात्षड्भात्समधिकोग्राह्यः षड्भादल्पकेनतून अर्कभंद्वादशभंग्राह्यंतस्यभागाः
कार्याः यदिग्रहोवैरिभेतर्हितेभागाः गुणांत्र्यंशोनाः कार्याः वक्रगंविना वक्रवतिंविना वक्रगतस्य
ग्रहस्यवैरिभेपित्र्यंशोनानकार्यइत्यर्थः तथाचोक्तंश्रीधरपद्धतौ वक्रचारंविनात्र्यंशोशत्रु
राशेगतेग्रहः तथाचश्रीपतिः त्र्यंशोलंहरतिशत्रुभेग्रहः स्वायुषोत्रनतुवक्रचारगः तथाचदा
मोदरः ततोविनावक्रगतिं हरेच्छत्रुनिजायुषस्त्र्यंशमपरेग्रहमिति होरामकरंदेपि त्र्यंशोहरंति
कुटिलारिपुराशिसंस्थाः यतोवक्रगतोग्रहो बलवानतः शत्रुग्रहगोपित्र्यंशंनहरति हिस्वा
वक्रगतिमितिवृत्तत्वात केपापाद्यक्तंकुजमितिशास्त्रव्यासंसदसत् अयुक्तत्वात् बहुवाक्य
विरोधाच्च शनिसितोविना अस्तमितेग्रहेसतितेआयुर्भागाः द्यासाअर्द्धिताः कार्याः
यतः शनिसितोसूर्यवैरएतेततस्तौसूर्यसान्निध्येनास्तंगतावपिस्वायुषोर्नहरतः एतद्धा २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

के.टी. निद्ध्येपुग पस्राप्ते एकएवाधिकाहानिःकार्या एतदुक्तंभवति वैरिभेयग्रहेत्र्यंत्रोहानिः तस्मिन्न
स्तंगते र्धहानिः एवंहानिद्ध्येप्राप्ते अधिकैवहानिरित्यर्द्धमेवहानिः कार्यस्यर्थः द्वानिसित्तयो
र्हानिद्ध्येप्राप्तेत्र्यंशहानिरेवयतस्तयोरस्तहानिर्नास्त्येव तथाहयवनः खेचरोजायतेयोर्द्धत्र्यं
शायोरपहारकः आयुषःसहरेद्र्धंत्र्यंशंशुक्रशनैश्चराविति अथपैंडनिसर्गजेवेपिआयुर्दा
येप्रागुदिताचक्रार्द्धहानिर्भवेत् षड्गात्यइत्यानीतगुणेनते भागाःगुणनीयाइत्यर्थः पापग्रहेल
ग्नेसतितेषांभागानांहानिविशेषमाह दायांस्याद्युसदांपृथक्कृततनुलवादिघ्नाःखषट्सुद्धृताः
३६० श्चासोनास्ततनुगेखलेचयदिसदृष्टेर्द्धयाथापरे निघ्नोयोदयभावजेनतनुगेग्रोचेद्दलिष्टस्य
तस्साम्येपुष्टफलेननेतितनुपेऽस्मिन्नंशजेसौक्रिया ७ २२ तनुगेलग्नगेखलेपापग्रहेसतिते
द्युसदांपायग्रहाणांदायांशाःपृथक्कृततनुलवादिघ्नाःलग्नस्यलवादिनानिघ्नाःकार्याःखषट्व्यद्धृताः

२१ श्चक्रांशाहृताःकार्याःआस्याललग्नालवादिकतयापृथक्कृस्थाद्वूनाःकार्याः अथापरेआचार्याइति
वदंति तयाआस्याउयोदयभावजेनलग्नगतक्रूरग्रहस्यलग्नस्थभावफलेननिघ्नाद्वूनाःकार्याःसो
